CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 762

Title Vaiśvadeva.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: ~~298~~ 762 Subject: Vedic lit.

Title: Vaiśvadeva.

Author: —

Scribe: Devaśankara.

Date of the work: —

Date of the Ms.: V.S. १८६९

Place of the work: —

Place of the Ms.: —

Size: 7.2" by 4.2"

Extent: 6 foll.

Language: Sanskrit.

Script: Devanāgari

Remarks: —

देवशींकरनीपोथि

॥ ॥ श्रीगणेशाय नमः ॥ ॥ सरस्वत्यै नमः ॥ अथ सायंप्रात
र्होमविधिर्लिख्यते ॥ अथ परिसमूहनं ॥ वार ३ ॥ ऋतंत्वा सत्येन
परिषिंचामि वार ३ ॥ समिद्धोमः ॥ वार १ ॥ ॐ अग्नये स्वाहा ॥ इदमग्न
येन मम ॥ ॐ प्रजापतये स्वाहा ॥ ॐ इदं प्रजापतये न मम ॥ समि
द्धोमः ॥ ॐ ऋतंत्वा सत्येन परिषिंचामि ॥ वार ३ ॥ प्रातःकाले ॥ प १
रिसमूहनं ॥ वार ३ सत्यं त्वर्त्तेन परिषिंचामि ॥ वार ३ ॥ ॐ सूर्
याय स्वाहा ॥ इदं सूर्याय न मम ॥ ॐ प्रजापते स्वाहा ॥ इदं

प्रजापतये न मम ॥ समिद्धोमः ॥ सत्यं त्वर्त्तेन परीषिंचामि ॥ वा
र ३ ॥ दक्षिणांजान्वाश्वहोमः ॥ एवं सर्वत्र ॥ अथ सायंप्रातर्वैश्व
देवलिख्यते ॥ ॐ परिसमूहनं ३ पर्युक्ष्य ३ ॥ समिदाधानं ॥ ॐ
सिद्धमन्नघृतक्तं जुहुयात् ॥ ॐ अग्नये स्वाहा ॥ ॐ इदमग्नये
न मम ॥ ॐ सोमाय स्वाहा ॥ ॐ इदं सोमाय न मम ॥ ॐ इंद्राग्निभ्यां
स्वाहा ॥ इदमिंद्राग्निभ्यां न मम ॥ ॐ विश्ववे स्वाहा ॥ इदं वि
श्ववे न मम ॥ ॐ नरधाज धन्वंतरे स्वाहा ॥ ॐ इदं त्तरसाज

धन्वंतरेन मम॥ विश्वेभ्यो देवेभ्यः स्वाहा॥ ॐ इदं विश्वेभ्यो
देवेभ्यो न मम। ॐ प्रजापतये स्वाहा॥ ॐ इदं प्रजापतये न मम॥ ॐ
अदितये स्वाहा॥ इदमदितये न मम॥ ॐ अनुमतये स्वाहा॥ इद
मनुमतये न मम॥ ॐ अग्नये स्विष्टिकृतेये०॥ ॐ इदमग्नये स्वि
ष्टकृतये न मम॥ उदको०॥ समिदाधानं॥ पर्युक्षणं॥ वारउ २
कृतशेषबलिनं कुर्यात्॥ अग्नये नमः॥ सोमाय नमः॥ इं
द्राग्निभ्यां नमः॥ विष्णवे नमः॥ भरद्वाजधन्वंतरये नमः॥

विश्वेभ्यो देवेभ्यो नमः॥ प्रजापतये नमः॥ अदितये नमः॥
अनुमतये नमः॥ अग्नये स्विष्टकृते नमः॥ उदको० नमो ब्र
ह्मणे ब्राह्मणेभ्यो नमः॥ वसिष्ठोक्तो तेस्त्रिष्टुप्॥ वास्तो
ष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः॥ य
त्वेमहे प्रति तं नो जुषस्व शंनो अस्त द्विपदे श चतुष्पदे
॥ वास्तोष्पतये नमः॥ नम इंद्राय रौंद्रेभ्यो नमः॥ नमो य
माय याम्येभ्यो नमः॥ उद०॥ नमो वरुणाय वारुणेभ्यो

नमः ॥ नमः सोमाय सौम्येभ्यो नमः ॥ नमो बृहस्पत
ये बार्हस्पत्येभ्यो नमः ॥ नमो ऽदितये आदित्येभ्यो न
मः ॥ नमो नक्षत्रेभ्यः ॥ ऋतुभ्यो नमः ॥ मासेभ्यो नमः
॥ अर्द्धमासेभ्यो नमः ॥ अहोरात्रेभ्यो नमः ॥ संवत्सरेभ्यो रे
नमः ॥ वृक्षपथिकृतेभ्यो नमः ॥ धात्रे नमः ॥ विधात्रे ३
नमः ॥ मरुद्भ्यो नमः ॥ विष्णवे नमः ॥ वनस्पतये नमः
॥ ओषधीभ्यो नमः ॥ पर्जन्याय नमः ॥ अद्भ्यो नमः ॥ नमः

श्रियै ॥ भद्रकाल्यै ॥ नमः सर्वान्नभूतये उदकोण ॥ नक्तंच
रेभ्यो नमः ॥ सायं ॥ अहश्चरेभ्यो नमः ॥ इति दिवा ॥ पञ्च
पो विश्वेदेवास्त्रिष्टुप् ॥ ये देवासो दिव्येकादश स्थ ते देवा
सो यज्ञमिमं जुषध्वं नमः ॥ अविज्ञाभ्यो देवताभ्यो नमः
॥ वनस्पतये नमः ॥ अपसव्यं ॥ हंसः शंखपितरस्त्रिष्टुप् ॥ ये
अग्निदग्धा ये अनग्निदग्धा मध्ये दिवा स्वधया मादयन्ते ॥ ते
भिः स्वधां रसुनिमे आंयथा वशं तन्वं कल्पयस्व ॥ पितृ

भ्यः स्वधा नमः ॥ सव्ये ॥ उदकोः स्पर्शनं ॥ कृतथशे
षं बलि कर्त्तव्यं ॥ शेषं मन्त्रे च तर्पयित्वा ॥ अस्योनस्य
प्रथमो विभागः ॥ विश्वेभ्यो देवेभ्यो यथाविभागं वः
स्वाहा ॥ अपसव्ये ॥ अस्यान्नस्य द्वितीयो विभागः
॥ अमुकसगोत्राः पितृपितामहप्रपितामहाः ॥ अमु ७
का अमुक अमुकशर्माणः ॥ अमुकसगोत्राः मा
मातामह प्रमातामह वृद्धप्रमातामहाः ॥ अमु

का अमुका अमुकशर्माणो यथाविभागं वः स्वधा ॥ कंठं
अस्योनस्य तृतीयो विभागः ॥ सनकादिमनुष्येभ्यो हंतो ॥
सव्ये ॥ अस्यान्नस्य चतुर्थो विभागः ॥ नंदादिकन्याभ्यो हं
तः ॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं ॥ अगस्त्य
स्य त्र्यायुषं ॥ यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषं ॥ प्रतिमं
त्रं ललाटे हृदये दक्षिणस्कंधे वामे च ततः पृष्ठे पंचसु
भस्मना त्रिपुंड्रं करोति ॥ आनो भद्रा इति सूक्तं जपेत् ॥

विश्वानिनोदुर्गहा॥२२॥ तत्वं योराष्ट्री महेगात्तंयज्ञाय
गात्तंयज्ञप० नुषेभ्यः॥ अर्द्धंजिगा० चतुष्पदे ॥ चतुर्नि
श्चचतुर्निश्च धात्र्यांपंचत्रिरेवच ॥ पुनर्धान्यां तस्मै यज्ञा
त्मनेनमः॥ ददतोमेदयोमात्वद्धर्मेबुद्धिविवर्द्धतां॥ म
नोमेरमतांसत्येत्वत्प्रसादद्धुताशनः॥ श्रीयज्ञपुरुषा ५
यनमः॥ ततोब्राह्मणमलिःमंत्रः॥ अपस्स्सव्यं॥ उश्वत्थोन
मः॥ श्वपचेत्थोनमः॥ वायोत्थोनमः॥ यद्भैतत्ते॥ सव्यं

हस्तचरणप्रक्षालनं॥ आचमनं॥ ॥ ब॥ इतिवैश्व
देवसमापत्तः॥ ब ॥ श्री॥ ॥ शिवः॥ ॥ ब॥
॥ श्री॥ ॥ संवत् १७६ [illegible]नावर्षे वैशाखमासे
शुक्लपक्षे ७ तोम वासरेणालिखितं॥ ॥ श्री ॥ ॥
॥ ब ॥ दी०नीलकंठसुत देवशंकरेणालिखितं॥ ६
॥ ॥ ॥ अत्तंव॥ ब॥ इतिवैश्वदेवसमा
प्तः॥ श्री॥ ब॥ लिख्यतेंत्तो मकासरं॥ ब॥

दैवशंकरनीपोथिसही